International Journal of Sanskrit Research 2016; 2(6): 173-174

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(6): 173-174
© 2016 IJSR
www.anantaajournal.com
Received: 13-09-2016
Accepted: 14-10-2016

**Samar Saha**
Junior Research Fellow of. U. G. C. C/O -Bhuban Saha. Student of Jadavpur University. Sanskrit Department Jadavpur, Kolkata 700032, West Bengal, India

**Correspondence**
**Samar Saha**
Junior Research Fellow of. U. G. C. C/O -Bhuban Saha. Student of Jadavpur University. Sanskrit Department Jadavpur, Kolkata 700032, West Bengal, India

# कविसृष्टेः उत्कर्षता

**Samar Saha**

संस्कृतसाहित्ये ग्रन्थकाराः ग्रन्थारम्भे स्वकीयग्रन्थस्य निर्विघ्नपरिसमाप्ताय पाठकानाञ्च इष्टप्राप्तये प्रायशः मङ्गलाचरणं कुर्वन्ति। राजानकमम्मटोऽपि स्वस्य 'काव्यप्रकाश' इति ग्रन्थस्य प्रथमे उल्लासे प्रथमकारिकायां समुचितेष्टदेवतां परामृशति –

''नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरूचिरां निर्मितिमादधती भारती कवेर्जयति।।''

नियतिकृतनियमरहितां ह्लादैकमयीम् अनन्यपरतन्त्रां नवरसरूचिरां निर्मितम् आदधती जनयन्ती कवेः भारती वागधिष्ठात्री देवता जयति इति।
अपि च अनेन मङ्गलश्लोकेन कविसृष्टिः नियतिसृष्टेः श्रेष्ठा इत्यपि ग्रन्थकारः प्रतिपादितवान्। उभयसृष्ट्योः केचन भेदाः सन्ति। ते यथा ;

**नियमरहिता** – नियतिरदृष्टम्। सृष्टिक्रियायां ब्रह्मा स्वतन्त्रः, तथापि सम्पूर्णनिरपेक्षतया सः स्रष्टुं नार्हति, प्राणिनामदृष्टस्य सामर्थ्यानुसारेणैव सः सृजति। अतः ब्रह्मणः निर्मितिः नियतिनियन्त्रिता। परन्तु कवेः निर्मितिः नियमरहिता। ब्रह्मसृष्टौ पद्मस्य उद्भवः केवलं जले एव सम्भवः परन्तु कविसृष्टौ पद्मस्य उद्भवः मुखेऽपि सम्भाव्यते। तदुच्यते –

''कमले कमलोत्पत्तिः श्रुयते न च दृश्यते।
बाले, तव मुखाम्भोजे दृष्टमिन्दीवरद्वयम्।।''

कविसृष्टौ नायिकायाः मुखपद्मे नयनरूपम् इन्दीवरद्वयं स्थातुमर्हति।

**ह्लादैकमयी** – इदं जगत् सत्त्वादिगुणत्रयेण त्रिगुणात्मकम्। सांख्यदर्शने उच्यते – ''सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः''। एतेभ्यो गुणेभ्यः सुखदुःखादीनाम् उद्भवो भवति, तस्मात् जगत् सुखदुःखमोहात्मकम्। किन्तु साहित्यजगत् केवलम् अविमिश्रानन्दपूर्णम्। करूणरसस्य काव्यं पठित्वापि पाठकचित्ते आनन्दस्य उपलब्धिर्भवति। भवभूतेः 'उत्तररामचरितम्' तत्र प्रमाणम्। प्रसिद्धिर्वर्तते – ''कारूण्यं भवभूतिरेव तनुते''।

**अनन्यपरतन्त्रा** – प्रत्येकं कार्यस्य किञ्चित् कारणं स्यात् जगत् कार्यं, तस्यापि कारणमस्ति। तत्सृष्टौ विधातुः चेष्टारूपं कर्म निमित्तकारणं परमाण्वादि उपादानकारणञ्च। 'आदि' शब्देनात्र स्रष्टुः ज्ञानम्, इच्छा, प्रयत्नः, कालः, दिक्, प्रागभावादयः अभिप्रेतः। यद्यपि जगत्सृष्टौ असमवायिकारणस्यापि प्रभावो विद्यते तथापि मम्मटेन तदनुक्तम्। परन्तु कविसृष्टिः मानसी सिद्धिः। कविः स्वोपलब्ध्या यदेव पश्यति तदेव प्रकाशयति। अतः साहित्यिकाः स्वेच्छया काव्यजगत् निर्मातुं शक्नुवन्ति। ध्वनिकारेण उक्तम् –

''अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते तत्, तथेदं परिवर्तते।।''

अतः कविसृष्टेः स्वतन्त्रतास्ति, ब्रह्मसृष्टेः नास्ति।

**नवरसरूचिरा** – जगति मधुरादयः षड्रसाः सन्ति। परन्तु ते सर्वे न सुखकराः भवन्ति। वृत्तौ उच्यते – ''षड्रसाः न च हृद्यैव तैः।'' परन्तु काव्ये शृङ्गारादिनवरसाः सन्ति। अपि च ते सर्वे अतीव रमणीयाः। साहित्यरसिकाः करूणरसस्य आस्वादेनापि अत्यन्तं तृप्तिं लभन्ते। विश्वनाथकविराजस्य 'साहित्यदर्पण' इति ग्रन्थस्य तृतीयपरिच्छेदे उच्यते –

''करूणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्।।''

यद्यपि लौकिकरसाः इन्द्रियग्राह्याः परन्तु साहित्यरसाः सहृदयहृदयग्राह्याः भवन्ति।

अतः जगतः वैशिष्ट्यं साधारणं, साहित्यस्य तु असाधारणमेव। कविसृष्टिः उत्कृष्टतरा, तस्मात् कवेः भारती जयति। 'जयति' शब्देन कविनात्र 'नमस्कार' इति आक्षिप्यते। कविः वागधिष्ठात्रीदेवतां प्रणमति इति आशयः। इत्थं ब्रह्मसृष्टिकविसृष्टयोः प्रभेदान् सूचयित्वा ग्रन्थकारः कविसृष्टेः उत्कर्षता प्रतिपादितवान्।

**सहायकग्रन्थसूची**

1. मम्मटभट्ट : काव्यप्रकाशः. रामानन्दाचार्यः संस्कृतपुस्तकभाण्डारः कलिकाता, १४०४ बङ्गाब्दः (प्रथमप्रकाशः १३८६)
2. मम्मटभट्ट : काव्यप्रकाशः (प्रथम उल्लासः). सुमितावसु. सदेशः कलकाता, २००४
3. भवभूतिः उत्तररामचरितम्. श्यामापदभट्टाचार्यः संस्कृतबुकडिपोः कलकाता, २०१० (प्रथमप्रकाशः २००७)
4. विश्वनाथः साहित्यदर्पणम्. उदयबन्द्योपाध्यायः संस्कृतबुकडिपोः कलकाता, २०११ (प्रथमप्रकाशः १९९८)